प्रश्नः – अधस्थितस्य श्लोकस्य प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्यानं कुरुत।

उत्तरम् –

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।

सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥ (गीता – १२.११)

श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगाख्ये द्वादशाध्याये समुपलभ्यते अयं श्लोकः।

कर्मफलत्यागस्य श्रेष्ठत्वं प्रतिपादयता भगवता श्रीकृष्णेन निगदितम् अथैतदप्यशक्तोऽसि ...इति।

अथ (त्वम्) यदि चेत् एतद् अपि इदम् कर्म अपि मत्कर्मपरमत्वं कर्तुम् सम्पादयितुम् अशक्तः असमर्थः असि भवसि, ततः तर्हि मद्योगम् कर्मसन्न्यासरूपं ममयोगम् आश्रितः अवलम्बितः यतात्मवान् (सन्) संयतचित्तः सन्, सर्वकर्मफलत्यागं सर्वेषां कर्मणां फलसन्न्यासं कुरु सम्पादय इति सान्वयप्रतिपदार्थाः।

इतः पूर्वं द्वादशाध्यायस्य प्रारम्भे अर्जुनेन प्रश्नः कृतः यत्, अक्षरब्रह्मोपासना तथा सोपाधिकोपासना इत्यनयोर्मध्ये कः मार्गः श्रेष्ठः इति। तत्र सोपाधिकोपासनायाः युक्ततमत्वम् उद्घोषितम् भगवता श्रीकृष्णेन। अक्षरसाधना अधिकक्लेशकरी, तस्मादेव कारणात् श्रीभगवान् अर्जुनाय भक्तिमार्गम् एव उपदिशति। तत्र भक्तिमार्गे प्रथमतः ईश्वरे एव मनोनिवेशनं कर्तव्यम्। तेन देहान्ते ईश्वरलाभ एव सम्भवति। ईश्वरे मनोनिवेशे असम्भवे सति अभ्यासयोगेन खलु चित्तसमाधानं कर्तव्यम्। तत्रापि अभ्यासः न सम्भवति चेत् कृष्णार्थे केवलं कर्म सम्पादनं युक्तम्। भगवन्तम् समुद्दिश्य कर्म सम्पादनम् अपि न सम्भवति चेत् मद्योगम् आश्रितः सन् सर्वकर्मफलत्यागं कुरु। क्रियमाणानि कर्माणि मयि संन्यस्य यत् कर्मानुष्टानं स योग इत्युच्यते। तं योगमाश्रित्य यतात्मवान् अर्थात् संयतचित्तः सन् सर्वेषां कर्मणां फलम परित्याज्यम्। योगपूर्वकं कर्मफलत्यागो हि श्रेष्ठो मार्गः। एतेनैव शान्तिः उपशमः अविद्यासंसारनिवृत्तिश्च सम्भवति इति श्रीमतां भगवतां सन्देशः इति शिवम्॥